अनुक्रमांक (अंकों में) / Roll No. (in figures) :

अनुक्रमांक (शब्दों में) / Roll No. (in words) : ____________

[कुल प्रश्नों की संख्या : 21] [Total No. of Questions: 21]
[कुल मुद्रित पृष्ठ : 04] [Total No. of Printed Pages : 04]

[समय : 3.15 घंटे] [Time: 3.15 Hours]
[पूर्णांक : 70] [Maximum Marks : 70]

# कक्षा 9वीं अर्द्ध वार्षिक परीक्षा, 2024–25
# Class 9th Half Yearly Examination, 2024-25
# संस्कृतम् / SANSKRITAM
# [ 906 ]

***सामान्य अनुदेश :***
1) परीक्षार्थी प्रश्न–पत्र के पहले पृष्ठ पर अपना अनुक्रमांक अवश्य लिखें।
2) प्रत्येक प्रश्न के सामने उसका अंक भार अंकित है।

***General Instructions :***
1) Candidate must write his/her Roll Number on the first page of the Question Paper.
2) Marks for every question are indicated alongside.

परीक्षार्थिभ्यः सामान्यनिर्देशाः –
(1) सर्वे प्रश्नाः अनिवार्याः।
(2) प्रत्येकं प्रश्नस्योत्तरं उत्तरपुस्तिकायामेव देयम्।
(3) प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम्।

## खण्ड – अ

**प्र.1** वस्तुनिष्ठ प्रश्नाः – (1×7=7)

(1) "भारत वसन्तगीतिः" गीतम् कस्मात् ग्रन्थात् संकलितः अस्ति?
(अ) पंचपात्रम् (ब) काकली (स) अर्थशास्त्रम् (द) ऋतुसंहारम्

(2) "लौहतुला" नामक पाठस्य क्रमः कः अस्ति?
(अ) तृतीयः (ब) प्रथमः (स) षष्ठः (द) चत्वारः

(3) श्री पद्मशास्त्रिणा रचितः ग्रन्थः अस्ति –
(अ) चाणक्य नीतिः (ब) विश्व कथाशतकम् (स) हितोपदेशः (द) मनुस्मृतिः

(4) "मातृ" शब्दस्य प्रथमाविभक्तेः एकवचनं रूपं अस्ति –
(अ) माता (ब) मात्रा (स) मातुः (द) मातरौ

(5) "बालकः" शब्दस्य सप्तमी विभक्तेः रूपं अस्ति –
(अ) बालकेन (ब) बालकस्य (स) बालके (द) बालकाय

(6) का पुरा लघ्वी भवति?
(अ) सज्जनानां मैत्री (ब) दुर्जनानां मैत्री (स) पशूनाम् मैत्री (द) सर्वं सत्यम्

(7) "इदम्" शब्दस्य पुल्लिंग षष्ठी विभक्तेः एकवचनं रूपं किमस्ति?
(अ) अनया (ब) अयम् (स) अस्य (द) इयाः

**प्र.2** निर्देशानुसारं रिक्तस्थानानि पूरयत – (1×5=5)

(1) संस्कृते .................................. उपसर्गाः सन्ति। (विंशतिः / द्वाविंशतिः)
(2) कवीनां कालिदासः ................................ अस्ति। (श्रेष्ठ + तमप्)
(3) छात्रः .................................. विद्यालयं गच्छति। (पठ् + तुमुन्)
(4) अहं यथाशक्ति दीनान् जनान् ........................। (सेव धातु लट्लकारः)
(5) तस्याः दुहिता विनम्रा .....................................। (अस् धातु लट्लकारः)

**प्र.3** अधोलिखितं अपठितं गद्यांशं पठित्वा एतदाधारित प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत –

मानव–जीवने श्रमस्य महत्त्वं सर्वे जनाः जानन्ति। मानवः श्रमयाश्रित्यैव सुखसमृद्धिं प्राप्नोति। जनः सुखं वाञ्छति, मनोरथं पूरयितुमभिलषति, जीवने समुन्नतिं कांक्षते, तत्सर्वस्य साधनं श्रममेव वर्तते। श्रम एव मानवस्य स्वाभिमानं शारीरिक–शक्तिं च प्रसारयति, सर्वेषु कार्येषु तस्य दक्षतामापादयति। अतएव श्रमेणैव सर्वत्र साफल्यं मिलति।

जनैः सदा सः श्रमः कर्त्तव्यः यतः सम्पत्तेः उद्भवो भवति, यतोहि व्यर्थं परिश्रमं कुर्वन् नरः पापभाक् भवति। प्रज्ञाः तुर्येऽपि वयसि परमं श्रमं न त्यजेयुः। यस्मिन् देशे जनाः पूर्णश्रमपरायणाः भवन्ति, तत्र वसुन्धराः धनैर्धान्यैः पूर्णा विराजते। धिषणाश्रमसंयोगः सर्वकार्येषु सिद्धिदः भवति। अश्रमा धिषणा व्यर्था भवति तथा च अधिषणः श्रमः व्यर्थः भवति। अतएव स्वस्य लोकस्य चोन्नतये सदैव श्रमः कर्त्तव्यः।

प्रश्नाः –

(1) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत। (1)

(2) एकपदेन उत्तरत – (4×½=2)

(1) श्रमस्य महत्त्वं के जानन्ति? (2) कीदृशः श्रमः व्यर्थः भवति?
(3) कः नरः पापभाक् भवति? (4) केनैव सर्वत्र साफल्यं मिलति?

(3) पूर्णवाक्येन उत्तरत – (1×2=2)

(1) मानवः कथं सुखसमृद्धिं प्राप्नोति? (2) श्रम एव मानवस्य किम् प्रसारयति?

(4) भाषिक कार्यम् – (4×½=2)

(1) "जनः सुखं वाञ्छति"। इत्यत्र क्रियापदं किम्?
(2) अस्मिन् गद्यांशे त्यजेयुः इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम्?
(3) व्यर्थ परिश्रमं इत्यनयोः पदयोः विशेषण पदं किम्?
(4) प्रस्तुत गद्यांशे "धिषणः" इत्यस्य विलोमपदं किं प्रयुक्तम्?

प्र.4 अधोलिखितं अपठितं गद्यांशं पठित्वा एतदाधारित प्रश्नानां उत्तराणि यथानिर्देशं लिखत –

उत्साहः, उदासीनता, निराशा, चेति तिस्त्रः मनसः अवस्थाः। शिशवः सदा उत्साहशीलाः इति विदितमेव। युवानः अपि प्रायेण उत्साहशीलाः। अनेके वृद्धाः अपि तथैव। वयसः उत्साहस्य च नास्ति सम्बन्धः। उत्साहः मानवस्य सहजः स्वभावः। सः मनसः शरीरस्य च विकासाय भवति। शिशुः उत्साहेन सर्वं ग्रहितुं सर्वं खादितुम् सर्वैः सह खेलितुं च प्रवर्तते, प्रतिबन्धे कृते रोदिति। उपहासे कृते क्रोधं प्रकटयति किन्तु निराशो न भवति।

(1) एकपदेन उत्तरत – (2×½=1)

(1) मनसः कति अवस्थाः सन्ति? (2) कः मानवस्य सहजः स्वभावः?

(2) पूर्णवाक्येन उत्तरत – (1×2=2)

(1) कस्य कस्य नास्ति सम्बन्धः? (2) मनसः तिस्त्रः अवस्थाः काः?

(3) भाषिक कार्यम् – (1×2=2)

(1) "सहजः स्वभावः" इत्यनयोः पदयोः विशेषणं पदं किम्?
(2) "सः मनसः शरीरस्य च विकासाय भवति"– इत्यत्र "सः" सर्वनाम्नः संज्ञापदं किम्?

## खण्ड – ब

प्र.5 अधोलिखितयोः शब्दयोः सन्धिः/विच्छेदं कृत्वा सन्धेः नामापि लिखत – (2)

(1) सुगन्धः + तु (2) परोपकारः

प्र.6 अधोलिखितयोः शब्दयोः समास/विग्रहं कृत्वा समासस्य नामापि लिखत – (2)

(1) राज्ञः पुरुषः (2) धर्माधिकारी

प्र.7 अधोलिखितयोः वाक्ययोः रेखांकित पदे विभक्तिं तत्कारणं च लिखत – (2)

(1) <u>राजमार्गम्</u> अभितः वृक्षाः सन्ति। (2) सः <u>नेत्राभ्याम्</u> अन्धः अस्ति।

प्र.8 अधोलिखितवाक्ययोः रेखांकितपदमाधृत्य प्रश्नं निर्माणं कुरुत। (4×½=2)

(1) <u>वृक्षाः</u> फलं न खादन्ति। (2) <u>मोदकानि</u> पूजानिमित्तानि रचितानि आसन्।
(3) ग्रामे <u>निर्धना–स्त्री</u> अवसत्। (4) वसन्ते <u>सरसाः रसालाः</u> लसन्ति।

प्र.9 स्वपाठ्यपुस्तकात् कोऽपि द्वौ श्लोकौ लिखत यौ अस्मिन् प्रश्न–पत्रे न स्यात्। (2)

प्र.10 अधोलिखितस्य श्लोकस्य हिन्दी भाषायां सप्रसंगं भावार्थं लिखत – (2)

श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम्।
आत्मनः प्रतिकूलानि परेषां न समाचरेत्।।

प्र.11 अधोलिखितस्य श्लोकस्य अन्वयं मञ्जूषातः पदानि चित्वा पूरयत – (1½)

यत्र देशेऽथवा स्थाने भोगा भुक्ताः स्ववीर्यतः।
तस्मिन् विभवहीनो यो वसेत् सः पुरुषाधमः।।

<u>अन्वयः</u> – यत्र देशे अथवा ............ स्ववीर्यतः ............ भुक्ता, तस्मिन् यः विभवहीनः वसेत्, ............ पुरुषाधमः।

(मञ्जूषाः – सः, स्थाने, भोगाः)

## खण्ड – स

प्र.12 अधोलिखितं गद्यांशं पठित्वा एतदाधारित प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत –

सर्वैः एवं निषिद्धः स बालो भग्नमनोरथः सन् – "कथमस्मिन् जगति प्रत्येकं एव स्वकार्ये निमग्नो भवति। न कोऽपि मामिव वृथा कालक्षेपं सहते। नमः एतेभ्यः यैः मे तन्द्रालुतायां कुत्सा समापादिता। अथ स्वोचितम् अहमपि करोमि इति विचार्य त्वरितं पाठशालाम् अगच्छत्। ततः प्रभृतिः स विद्याव्यसनी भूत्वा महतीं वैदुषीं प्रथां सम्पदं च अलभत्।

(1) एकपदेन उत्तरत – (2×½=1)

(1) सः बालः कैः निषिद्धः? (2) कोऽपि वृथा किं न सहते?

(2) पूर्णवाक्येन उत्तरत – (1×2=2)

(1) अस्मिन् जगति प्रत्येकं कुत्र निमग्नो भवति? (2) बालः विद्याव्यसनी भूत्वा किम् अलभत्?

(3) भाषिक कार्यम् – (1×2=2)

(1) "घृणा" इत्यस्य पर्यायपदं चित्वा लिखत। (2) "महतीम्" इति विशेषणस्य विशेष्य पदं किम्?

**अथवा**

पुरा कस्मिंश्चिद् ग्रामे एका निर्धना वृद्धा स्त्री न्यवसत्। तस्याः च एका दुहिता विनम्रा मनोहरा चासीत्। एकदा माता स्थाल्यां तण्डुलान् निक्षिप्य पुत्रीम् (पुत्रीम्) आदिशत्। "सूर्यातपे तण्डुलान् खगेभ्यो रक्ष।" किञ्चित् कालादनन्तरम् एको विचित्रः काकः समुड्डीय तस्याः समीपम् आगच्छत्।

(1) एकपदेन उत्तरत – (2×½=1)

(1) माता स्थाल्यां कान् निक्षिप्य पुत्रीमादिदेश? (2) माता तण्डुलान् केभ्यः रक्षितुं कथयति?

(2) पूर्णवाक्येन उत्तरत – (2×1=2)

(1) वृद्धा स्त्री कुत्र न्यवसत्? (2) निर्धनवृद्धायाः पुत्री कीदृशी आसीत्?

(3) भाषिक कार्यम् – (2×1=2)

(1) "आदिशत्" इति क्रियापदस्य गद्यांशे कर्तृपदं किम् प्रयुक्तम्?

(2) "विचित्रः" इति विशेषणस्य विशेष्य पदं किमस्ति?

प्र.13 अधोलिखितं पद्यांशं पठित्वा एतदाधारित प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत –

वहति मन्दमन्दं सनीरे समीरे
कालिन्दात्मजायास्सवानीरतीरे
नतां पङ्क्तिमालोक्य मधुमाधवीनाम्।।

(1) एकपदेन उत्तरत – (2×½=1)

(1) "कलिन्दात्मजा" का वर्तते? (2) कासां पङ्क्तिम् नतां वर्तते?

(2) पूर्णवाक्येन उत्तरत – (2×1=2)

(1) कस्याः सवारनीरतीरे वायुः मन्दमन्दं वहति?

(2) यमुनायाः तीरे कविः काम् अवलोकयितुं कथयति?

(3) भाषिक कार्यम् – (2×1=2)

(1) "समीरे" इत्यस्य विशेषण पदं किम्? (2) शनैः शनैः इत्यस्य पर्यायशब्दः कः?

**अथवा**

गुणाः गुणज्ञेषु गुणाः भवन्ति, ते निर्गुणं प्राप्य भवन्ति दोषाः।
आस्वाद्यतोयाः प्रवहन्ति नद्यः, समुद्रमासाद्य भवन्त्यपेयाः।।

(1) एकपदेन उत्तरत – (2×½=1)

(1) गुणाः केषु गुणा भवन्ति? (2) काः आस्वाद्यतोयाः प्रवहन्ति?

(2) पूर्णवाक्येन उत्तरत – (2×1=2)

(1) गुणाः कम् प्राप्य दोषाः भवन्ति? (2) नद्यः कम् आसाद्य अपेयाः भवन्ति?

(3) भाषिक कार्यम् – (2×1=2)

(1) "प्रवहन्ति" इति क्रियापदस्य कर्तृपदं किम्? (2) "आस्वाद्यतोयाः" इति विशेषणस्य विशेष्यपदं किम्?

प्र.14 "लौहतुला" अथवा भान्तो बालः कस्यचितस्य एकस्य पाठस्य हिन्दीभाषायां सारं लिखत। (2)

प्र.15 अधोलिखित शब्दानां हिन्द्याम् अर्थ लिखत – (4×¼=1)

(1) प्रासादः (2) धेनुः (3) वृत्रम् (4) तन्द्रालुः

प्र.16 अधोलिखित सप्तप्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – (7×½=3½)

(1) कविः कीदृशीं गीतिं गातुं कथयति?
(2) स्वर्णकाकः इति पाठस्य रचयिता कः?
(3) कुम्भकारः घटान् किमर्थं रचयति?
(4) प्रियवाक्यप्रदानेन के तुष्यन्ति?
(5) "भ्रान्तो बालः" इति पाठस्य मूलग्रन्थः कः अस्ति?
(6) तुला कीदृशी आसीत्?
(7) वित्ततः क्षीणः कीदृशः भवति?

## खण्ड – द

प्र.17 भवान् राजकीयः उच्च–माध्यमिकः विद्यालयस्य छात्रः स्वं दीपांशुः मत्वा स्वकीयं प्रधानाचार्यं प्रति अवकाशार्थं प्रार्थना पत्रं लिखतु। (4)

**अथवा**

अधोलिखितं पत्रं मञ्जूषासहायतया रिक्तस्थानानि पूरयित्वा लिखत –

| |
|---|
| **मञ्जूषाः** – प्रणामाः, परीक्षाभवनात्, शिक्षानिदेशकः, मया, वार्षिकोत्सवः, व्यस्ताः, अस्माकम्, योगेभ्यः, प्रियमित्रम्, मित्रम् |

प्रिय ....................।

..................................

दिनाङ्कः – 10.11.2024

.................... तव पत्रम् अधिगतम्। मया पत्रेण ज्ञातं यत् गतसप्ताहे विद्यालयस्य .................... आसीत्। त्वं सर्वे अध्यापकाः च .................. अतिष्ठन्। कार्यक्रमस्य मुख्यातिथिः ............... आसीत्। सः .................... कार्यक्रमस्य प्रशंसाम् अकरोत्। सः ........... छात्रेभ्यः पुरस्कारान् प्रायच्छत्।

पितृभ्यां सादरं।

भवतः ..............

भूपेन्द्रः

कक्षा – नवमी

प्र.18 मञ्जूषातः उपयुक्त पदानि गृहीत्वा "माता–पुत्रयोः" मध्ये भोजन विषये संवादं पूरयत – (8×½=4)

| |
|---|
| **मञ्जूषातः** – आगच्छन्तु, लवणं, स्वादिष्टम्, पायसं, स्वीकरोतु बुभुक्षा, विशेषः, रामनवमी, रुचिकरं, भोजनार्थम् |

पुत्रः – अम्ब! महती (i) .............................................. अस्ति। शीघ्रं भोजनं आनयतु।
अम्बा – वत्स। (ii) ...................................................................... सर्वान् आह्वयतु।
पुत्रः – सर्वे शीघ्रम् (iii) .......................................................................................
अम्बा – अद्य ओदनम्, सूपः, शाकं, रोटिका, पर्पटः, पायसम् च सन्ति।
पुत्रः – अद्यः कः (iv) ............................................................................................
अम्बा – अद्य (v) ...................................................................... भोः। अतः पायसं कृतवती।
पुत्रः – अम्बः अद्य शाके लवणमेव न योजितवती। (vi) ............................ परिवेष्यतु।
अम्बा – अहो विस्मृतवती। (vii) ......................................................... लवणम्।
पुत्रः – अम्बः। (viii) ............................................................................ अधिकम् अस्ति।
अम्बा – आम्, अस्ति, वत्स। पायसं कथमस्ति।

**अथवा**

"जलस्य महत्त्वम्" इति विषयम् अधिकृत्य संस्कृतेन पञ्च वाक्यानि लिखत। सहायतायै मञ्जूषायां पदानि दत्तानि। (4)

| |
|---|
| **मञ्जूषा** – जलम्, क्षेत्राणाम्, विना, जीवने, स्नानाय, भोजनस्य अस्माभिः, महत्त्वपूर्णम्, कर्तुम्, क्षालनाय, दूषितेन, जायन्ते |

प्र.19 अधोलिखितवाक्यानि क्रमरहितानि सन्ति। यथाक्रमं संयोजनं कृत्वा लिखत। (6×½=3)

(i) मूषकः परिश्रमेण जालम् अकृन्तत्।
(ii) सः सम्पूर्णं प्रयासम् अकरोत् परं बन्धनात् न मुक्तः।
(iii) एकदा सः जाले बद्धः।
(iv) तदा तस्य स्वरं श्रुत्वा एकः मूषकः तत्र आगच्छन्।
(v) सः उच्चस्वरेण गर्जना अकरोत्।
(vi) एकदा एकस्मिन् वने एकः सिंहः वसति स्म।

प्र.20 अधोलिखित–वाक्येषु केषाञ्चित् त्रयाणां वाक्यानां संस्कृतभाषायां अनुवादं कुरुत। (1×3=3)

(1) छात्र मैदान में दौड़ते हैं।
(2) रमेश और सुरेश पुस्तक पढ़ते हैं।
(3) वे सब पत्र लिखते हैं।
(4) तुम दोनों यहाँ आओ।
(5) हम दोनों विद्यालय जाते हैं।

प्र.21 अधप्रदत्तं मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृतेन चत्वारः वाक्यानि लिखत – (4×½=2)

| |
|---|
| **मञ्जूषा** – माधवः, माता, ज्वरपीड़ित, चिकित्सकः, औषधं चिकित्सालयं, नीरोगः |

------------------------------------------------